दिनाङ्क :- 07.11.2025

प्रात: - 06:55

## बिहार विधानसभा निर्वाचनस्य

बिहारविधानसभानिर्वाचनस्य प्रथमे चरणे षड् षष्ठि दशमलवोत्तर चतुःषष्ठि प्रतिशतं यावत् मतदानम् अभिलिखितम्। अनेन निर्वाचनेन इ. वि. एम्. यन्त्रे आहत्य चतुर्दशोत्तर-त्रिशताधिकैक-सहस्रं यावत् प्रत्याशिनां भाग्यं पिहितम्। अस्मिन् चरणे ये प्रमुखाः नेतारः स्पर्धायां आसन् तेषु भाजपा-नेतारौ, उपमुख्यमन्त्री सम्राट् चौधरी, विजय कुमार् सिन्हा इत्यतौ, नितीश कुमारस्य मन्त्रिमण्डलस्य षोडश मन्त्रिणः, आर्. जे. डी-नेता तथा महाघटबन्धनस्य मुख्यमन्त्रीपदस्य प्रत्याशि तेजस्वी प्रसाद यादवः च अस्ति। लघु घटनाः विहाय मतदानं प्रायः शान्ति पूर्णम् आसीत्। लखिसराय्-मण्डले, केचन उपद्रवीजनाः उपमुख्यमन्त्रिणः तथा भाजपेति दलस्य प्रत्याशिनः विजयकुमारसिन्हायाः वाहनस्य उपरि मतदानकेन्द्रस्य समीपे आक्रमणं कृतवन्तः। निर्वाचन-आयोगः घटनैषा गम्भीरतया स्वीकृत्य डी. जी. पी. विनयकुमारं सम्बद्धानां विरुद्धम् कठोराचरणाय निर्देशं दत्तवान्। निर्वाचन-आयोगस्य अन्ताराष्ट्रिय-निर्वाचन-आगन्तुक-कार्यक्रमस्य अन्तर्गतं षट्-देशानाम् प्रतिनिधयः पटना, मुज़फ़्फ़रपुर, वैशाली, नालन्दा इत्येतेषु निर्वाचनक्षेत्रेषु भ्रमणं कृतवन्तः। ते मतदानप्रक्रियायाः निरीक्षणं कृत्वा स्वतन्त्रं, निष्पक्षं, पारदर्शकं च निर्वाचनं सुनिश्चेतुं निर्वाचन-आयोगेन कृतानां उपक्रमाणां प्रशंसाम् कृतवन्तः।

## पीएम -"वंदे मातरम्"

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां "वंदे मातरम्" इति राष्ट्रगीतस्य सार्धैकशत-वर्षाणाम् पूर्त्यवसरे वर्षपर्यन्तस्य स्मरणोत्सवस्य उद्घाटनम् करिष्यति। अस्मिन् अवसरे सः स्मारक प्रैष्यचिटीकायाः मुद्रायाः च विमोचनं करिष्यति। सामाजिकान्तर्जालीय पटले एकस्मिन् सन्देशे प्रधानमन्त्री श्रीमोदी उक्तवान् यत्, अयं दिवसः प्रत्येकस्य भारतीयस्य कृते महत्त्वपूर्णः अवसरः अस्ति इति। अस्मिन् उत्सवे सार्वजनिकस्थानेषु "वंदे मातरम्" इत्यस्य पूर्ण-संस्करणस्य सामूहिक-गायनम् भविष्यति, यत्र समाजस्य सर्ववर्गस्य जनानां उत्साहपूर्ण-सहभागिता भविष्यति। वंदे मातरम् इत्यस्य रचना बङ्किमचन्द्रचटर्जी वर्येण अक्षयनवम्यां तिथौ पञ्चसप्तत्यधिक अष्टशतोत्तरैकसहस्रतमे वर्षे नवम्बर्-मासस्य सप्तमे दिनाङ्के कृताऽसीत्। मातृभूम्यां बलस्य, समृद्धेः, देवत्वस्य च प्रतीकरूपेण आह्वयन् गीतमिदं भारतस्य एकतायाः, राष्ट्रिय-गौरवस्य च चिरस्थायी प्रतीकम् अभवत्।

## जितेन्द्र - लक्सम्बर्ग्

भारत-लक्सम्बर्ग्-देशौ विज्ञान- प्रौद्योगिकी, अन्तरिक्ष-अन्वेषण-क्षेत्रेषु सहयोगं सदृढं कर्तुं प्रतिबद्धतां पुनः दृढीकृतवन्तौ। नवदिल्यां एकस्मिन् सम्मेलने विज्ञान-प्रौद्योगिकी-मन्त्री डा. जितेन्द्रसिंहः, लक्सम्बर्ग्-नगरस्य ग्रैन्ड्-डची इत्यस्य राजदूतः क्रिस्टियन् बीवर्-वर्यः च युरोपीयेपणेषु भारतीय-स्पेस्-स्टार्ट्-अप्-इत्येतं प्रवर्धयितुं मार्गानां अन्वेषणे विचारं कृतवन्तौ। विज्ञान-प्रौद्योगिकी-

मन्त्रालयेन उक्तं यत्, सभा सैबर्-सुरक्षा, क्वाण्टम्-प्रौद्योगिकी, कृत्रिम-बुद्धि इत्यादिषु नवान्वेषण-क्षेत्रेषु संयुक्त-उपक्रमान् अग्रे नेतुं केन्द्रितम् आसीत्।

सीतीरामन-असम

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः अद्य असम्-राज्यं गमिष्यति। द्विदिवसीययात्रायां केन्द्रीय-वित्त-मन्त्री गुवाहाटी-नगरे द्वयोः प्रमुखयोः परियोजनयोः उद्घाटनं करिष्यति, सहैव राज्यविश्वविद्यालयस्य शिलान्यासं च करिष्यति। गुवाहाटी-नगरे केन्द्रीयमन्त्री अत्याधुनिक-नदी-टर्मिनल् इत्यस्य गुवाहाटी-गेट्-वे-टर्मिनल् इत्यस्य, गुवाहाटी-रिवरफ्रंट-परियोजनायाः च उद्घाटनं करिष्यति, तथा च मोरिगाव्-मण्डलस्य जगीरोड्-सेमिकण्डक्टर्-प्लाण्ट्-स्थलस्य अपि निरीक्षणं करिष्यति।

ऋतुविज्ञान विभाग

भारत-ऋतु-विभागेन अद्य तमिलनाडु-पुदुचेरी-करैकल्-प्रदेशेषु पृथक् पृथक् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम्। विभागेन उक्तं यत् आन्ध्रप्रदेशे, केरले, माहे, दक्षिणान्तरिक-कर्नाटके च केषुचित् स्थानेषु विद्युद्द्योतनेन सह निम्न वृष्टेः संभावना अस्ति। विभागेन उक्तं यत् आगामि-अष्टचत्वारिंशत् होरासु मध्यभारते न्यूनतम - तापमानेषु द्वितः चत्वारि डिग्री सेल्सियस् यावत् न्यूनाता आगमिष्यति।

हॉकी

अद्य भारतीय-हाकीति क्रीडायाः शतानि वैभव-युत-वर्षाणि आचरितुं राष्ट्रव्यापि उत्सवः आचर्यते।